CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

S.D.P.B.

Coll. No. 899

Title Bāṭukabhairava Kavaca

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 899 Subject: Tantric lit.

Title: Baṭukabhairavakavaca.

Author: — Scribe: Pandyā Kamalāśankar

Date of the work: — Date of the Ms.: V.S. १८४०

Place of the work: - Place of the Ms.: -

Size: 6.6" by 4.2" Extent: 7 foll.

Language: Sanskrit Script: Devanāgarī

Remarks: —

॥२॥ ॥ श्री० ॥ श्रीबटुकभैरवाय नमः ॥ पार्वत्युवाच ॥ श्री यत्नैर्भैर
वो देवो नमो भैरवदेवता ॥ देवेशी देहरक्षार्थं कारणं कथ्य
तां ध्रुवं ॥ १ ॥ म्रियंते साधका येन विनाशम्य शांन भूमिषु ॥
रणेषु चाति घोरेषु महावायुजलेषु च ॥ २ ॥ शृंगी मलिले
वज्रेषु ज्वरादि व्याधिवह्निषु ॥ ईश्वर उवाच ॥ कथयामि श्रृ
णु प्राज्ञ बटोश्च कवचं शुभं ॥ ३ ॥ गोपनीयं प्रयत्नेन मातृजा
रीयथा न था ॥ श्रीपार्वत्युवाच ॥ भगवन्सर्ववेत्ता ऽत्वं देवा
नां प्रीतिकारकः ॥ ४ ॥ भैरवं कवचं ब्रूहि यदि वास्ति कृपा
मयि ॥ प्राणत्यागं करिष्यामि यदि नो कथयिष्यसि ॥ ५ ॥ ॥२॥

सत्यं सत्यं पुनः सत्यं सत्यमेव न संशयः ॥ इत्थं देव्या वच
श्रुत्वा प्रहस्याति समं प्रभुः ॥ ६ ॥ उवाच वचनं तत्र देवदे
वो महेश्वरः ॥ श्रीमहादेव उवाच ॥ बटुकस्य कवचं दि
४ म व्यं श्रृणु वत्याण वक्ष्ये ऽहं ॥ ७ ॥ चंडिकातंत्र सर्वस्वं बटुक
स्य विशेषतः ॥ तत्र मंत्राद्यक्षरं चैव वासुदेव स्वरूपकं ॥
८ ॥ शंखवर्णो भिवेद्बुध्य बटुकस्य कुंडशेखरः ॥ आपदुद्धा
रणो नाम भैरवः परिकीर्तितः ॥ ९ ॥ प्रवक्ष्यामि समासे
न चतुर्वर्गस्य सिद्धये ॥ प्रणवं कामदं विद्या लज्जाबीजं
च सिद्धिदं ॥ १० ॥ बटुकायेति विज्ञेयं महापातकनाश

॥२॥ ने ॥ आपदुद्धारणायेति नित्यापदुद्धारकं नृणां ॥ ११ ॥ कुक्षि
द्वयं महेशानि मोहनं परिकीर्त्तितं ॥ द्वाविंशत्यक्षरो मंत्रो
क्रमेणानुगदीश्वरः ॥ १२ ॥ अस्य श्रीबटुकभैरवकवच
स्यानंदभैरव ऋषिरनुष्टुप् छंदः ॥ ह्रीं बटुकभैरवो देवता
वं बीजं ॥ ह्रीं शक्ति बटुकाय कीलकं ॥ श्रीगुरुप्रसादप्र
त्यर्थे मम सर्वार्थसाधने जपे विनियोगः ॥ सहस्रारे म
हापद्मे कर्पूरधवलो गुरुः ॥ पातु मां बटुको देवो भैरवः
सर्वकर्मसु ॥ १३ ॥ पूर्वस्यामसितांगो मे दिशि रक्षतु स
र्वदा ॥ आग्नेयां च रुरुः पातु दक्षिणे चंडभैरवः ॥ १४ ॥२॥

नैरृत्ये क्रोधनः पातु मामुन्मत्तस्तु पश्चिमे ॥ वायव्यां मे क
पाली च नित्यं पातु सुरेश्वरः ॥ १५ ॥ भीषणो भैरवः पातु
त्तरस्यां तु सर्वदा ॥ संहारभैरवः पातु दिश्यैशान्यां महेश्व
धा रः ॥ १६ ॥ ऊर्ध्वं पातु विधाता वै पाताले नंदको विभुः ॥ ॐ पातु
शिरसि नित्यं पातु ह्रीं केशदेशके ॥ १७ ॥ बटुकाय पातु हृदे
८५ ये नाभौ चोद्धारणाय च ॥ ॐ हृदये लिंगमूले आधारे ब
टुकाय च ॥ १८ ॥ सर्वदा पातु ह्रीं बीजं बाह्वोर्युगलमेव च ॥
षडंगसहितो देवो नित्यं रक्षतु भैरवः ॥ १९ ॥ ॐ ह्रीं बटु
कायस्तनते सर्वांगं मम सर्वदा ॥ ॐ ह्रीं मं ह्रां कालाय

२८॥ पादयोः पातु विन्यासनं हृदि ॥ २० ॥ ॐ ह्रीं महाकालशिरः
पातु कंठदेशे तु भैरवः ॥ ॐ ह्रीं दंडपाणि गुह्यमूले भैरवी
सहितस्तथा ॥ २१ ॥ ॐ ह्रीं ललितभैरवः पातु अष्टाभिः शा
क्तिभिः सह ॥ ॐ ह्रीं विश्वनाथः सदा पातु सर्वांगं मम सर्व
दा ॥ २२ ॥ ॐ ह्रीं अन्नपूर्णा सदा पातु अंशे रक्षतु चंडिका
॥ असितांग शिरः पातु ललाटं पातु भैरवः ॥ २३ ॥ चंडभैर
वः पातु वक्त्रे कंठे श्रीक्रोधभैरवः ॥ उन्मत्तभैरवः पातु हृद
ये मम सर्वतः ॥ २४ ॥ नाभिदेशे कपाली च लिंगे संहारभैर ३॥
वः ॥ मूलाधारे भीषणश्च बाहुयुग्मं च भैरवः ॥ २५ ॥ हंस

बीजं पातु हृदि सोहं रक्षतु पाणयोः ॥ प्राणापानसमा
नेच उदान व्यानमेव च ॥ २६ ॥ रक्षंतु द्वारमूले च दश दिक्षु
समंततः ॥ प्रणवः पातु सर्वांगं लज्जाबीजं महाभये ॥ २७ ॥
मध्ये नानन्दकमो पायात्सर्वतो देवसेवितः ॥ वामदेवो
वतु प्रांते वने घोरे तथावतु ॥ २८ ॥ जलेन तत्पुरुषः पातु स्थ
(२) ले पातु गुरुः सदा ॥ डाकिनी पुत्रक पातु पुत्रान्मे सर्वतः प्र
भूः ॥ २९ ॥ हाकिनी पुत्रकः पातु दुडाकिणी सुतः प्रिय
॥ पातु शाकिनी पुत्रः श्रियं मे सर्वतो गिरः ॥ ३० ॥ मालि
नी पुत्रकः पातु पशुनः श्वान गजोस्तथा ॥ महाकालोव

का

॥४॥

ध्वछत्रं सैन्यं वै कालभैरवः ॥ ३१ ॥ वाद्यं वाद्यप्रियः पातु
भैरवो नीतिहा पुनः ॥ इति श्रीब्रह्मकवचं भैरवस्य प्रकी
र्तितं ॥ ३२ ॥ चतुर्वर्गप्रदं नित्यं स्वयं देवप्रकाशितं ॥ यः प
ठेच्छृणुयाद्देवि धारयेत्कवचोत्तमं ॥ ३३ ॥ सदानंदमयो भू
त्वा लभते परमं पदं ॥ यश्चैनं चिंतयेद्देवि कवचं मन्मुखो
दितं ॥ ३४ ॥ कोटिजन्मार्जितं पापं विनश्यति तत्क्षणे
जलमध्येऽग्निमध्ये वा दुर्ग्रहे शत्रुसंकरे ॥ ३५ ॥ कवचस्म
रणाद्देवी सर्वत्र विजयी भवेत् ॥ भक्तियुक्तेन मनसा कव ४॥
चं पूजयेद्यदि ॥ ३६ ॥ कामतुल्यस्तु नारीणां रिपूणां च य

मोपमे ॥ तस्य पादांबुजद्वंद्वं राज्ञां किरीटभूषणं ॥ ३७ ॥ त
स्य भूमिर्विलोक्यैव कुवेरोऽपि तिरस्कृतः ॥ अस्य विज्ञा
नमात्रेण मंत्रसिद्धिर्न संशयः ॥ ३८ ॥ इदं कवचमज्ञात्वा
यो जपेत् बटुकं नरः ॥ समवाप्नोति फलं तस्य परे च नर
कं व्रजेत् ॥ ३९ ॥ मन्त्रेण रक्षयेच्छित्वा निर्यग्यो निपुजाय
ते ॥ रक्षोलोकमहामारी दारिद्र्येणापि पीडितः ॥ ४० ॥ श
त्रूणां वशगो भूत्वा करपात्री भवेन्नरः ॥ देयं पुत्राय शि
ष्याय शांताय प्रियवादिने ॥ ४१ ॥ कार्पण्यहीनाया लेब
टुके भक्तिरताय च ॥ यो परीक्ष्य प्रदानाद्वै तस्य नश्यति

।।५।। सत्वरं ॥ ४२ ॥ आयुर्विद्यायशोधर्मबलं चैव न संशयः ॥
एतत् कवचमीशानः तव स्नेहात् प्रकाशितं ॥ ४३ ॥
नाख्येयं नरलोकेषु सारभूतं सुरप्रिया ॥ यस्मै कस्मै
न दातव्यं कवचं मनुविदुर्लभं ॥ ४४ ॥ न देयं परशिष्ये
भ्यो ऽल्पपुण्येभ्यश्च शंकर ॥ यो ददाति निषिद्धेभ्यो वै
नष्टश्च भवेद्ध्रुवं ॥ ४५ ॥ अनेन कवचेनैष रक्षां कृत्वा
विचक्षणः ॥ विचरन्यत्र कुत्रापि विघ्नाघैः प्राप्यते न
सः ॥ ४६ ॥ मंत्रेणाघ्रियते यो नी कवचं भैरवस्य वै ॥ त ।५।।
स्मात् सर्वप्रयत्नेन दुर्लभं प्राप्य चेतसा ॥ ४७ ॥ भूर्जे र

मात्वचे चापि लिखितं विधिवत् प्रभो ॥ धारयेत् पाठये
द्वापि श्रावयेद्वापि नित्यशः ॥ ४८ ॥ दीर्घायुः कामभोगे
च धनधान्यसमृद्धिमान् ॥ जीनव्याधि रूपवान् स्यात् कुल
या वभिजायते ॥ ४९ ॥ मेधावी रूपशीलः स्यात् सत्व
वानपिजायते ॥ चतुर्वर्गफलं चास्य तिष्ठत्येव न सं
शयः ॥ ५० ॥ अन्यस्य दुर्लभः सोपि पुत्रदारधनान्वितः
॥ इह लोके सुखं भुक्त्वा परे मुक्तो भविष्यति ॥ ५१ ॥ न त
स्य विघ्ना भवन्ति न शोकान्नु विजायते ॥ वेताला श्चापि
शाश्च राक्षसाश्च भयप्रदा ॥ ५२ ॥ ने सर्वे विलयं यान्ति क

१८ वंस्यापि कीर्त्तिमान् ॥ नत्र देशे तु दुर्भिक्षं न तु मारीश्च
वर्त्तते ॥ ५३ ॥ न रोगाश्च प्रजायंते नोत्पाताः प्रभवंति हि
॥ त्रिविधाश्चैव योगिन्या नस्य साधकसंनिधौ ॥ ५४
शांतिं चैव प्रयच्छंति एकांतसिद्धुत्तमसदा ॥ नस्य शत्रु
श्च देवेशा ल्लक्षणामात्रं प्रयोगतः ॥ ५५ ॥ विनश्यंति न सं
देहो योगिन्यो भक्षयंति ते ॥ शांतिकानि कर्माणि मा
रणादीनि यानि च ॥ ५६ ॥ वाचामात्रेण देवेश नस्याति
ष्ठंति मुनसे ॥ न पापैर्लिप्यते देव महोघौघसमुदारु
णैः ॥ ५७ ॥ न च कार्यवशं गच्छेन्न नरानच दुःखिनः ॥ सर्वदा

च सुखिः प्राप्नोः सर्वतीर्थफलं लभेत् ॥ ५८ ॥ नानेन स
दृशं किंचित्कवचं भुवि ज्ञायते ॥ देवासुरमनुष्याणां
न तत्स्वरूपं त्वभावन ॥ ५९ ॥ यस्य विज्ञानमात्रेण सम्य
क् सिद्धिः प्रजायते ॥ श्रेष्ठं यं स्वमते ज्ञानं मुक्तिस्थानं ग
मिष्यति ॥ ६० ॥ सर्वलक्षणहीनोपि स्मरणात्कल्मषा
पहं ॥ श्लोकं वच महात्म्यं पाठमात्रस्य नित्यशः ॥ ६१
विनापि योगकार्येण योगिनां सम्मतां व्रजेत् ॥ संप्राप्नो
ति फलं सर्वं नात्र कार्या विचारणा ॥ ६२ ॥ सततं पठते
यत्र तत्र भैरव संस्थितिः ॥ न शक्नोति प्रभावं वै कवच

॥१२॥

स्याम्यवालिँतु ॥ ८३ ॥ नमो भैरवदेवाय सारभूताय वैन
मः ॥ नमस्त्रैलोक्यनाथाय सर्वज्ञापन मोनमः ॥ ८४ ॥
इति श्रीदेवीहरिहरसंवादे बटुकभैरवकवचसंपूर्णं
॥ समाप्तं ॥ ॥ श्रीबटुकभैरवमस्तु छे ॥ ॥ ७ ॥ ७ ॥
॥ संवत् १८८९ ना वैशाख सुध ३ वार रवौ ले
॥ पंड्या कमलाशंकर रतनशंकरे लखी आप्य

॥७॥